# नीलसरस्वतीस्तोत्रम्

घोररूपे महारावे सर्वशत्रुभयंकरि।
भक्तेभ्यो वरदे देवि त्राहि मां शरणागतम् ।। 1 ।।
ॐ सुरासुरार्चिते देवि सिद्धगन्धर्वसेविते।
जाड्यपापहरे देवि त्राहि मां शरणागतम् ।। 2 ।।
जटाजूटसमायुक्ते लोलजिह्वान्तकारिणि।
द्रुतबुद्धिकरे देवि त्राहि मां शरणागतम् ।।3।।
सौम्यक्रोधधरे रूपे चण्डरूपे नमोऽस्तु ते।
सृष्टिरूपे नमस्तुभ्यं त्राहि मां शरणागतम् ।।4।।
जडानां जडतां हन्ति भक्तानां भक्तवत्सला।
मूढ़तां हर मे देवि त्राहि मां शरणागतम् ।।5।।
वं ह्रूं ह्रूं कामये देवि बलिहोमप्रिये नमः।
उग्रतारे नमो नित्यं त्राहि मां शरणागतम् ।।6।।
बुद्धिं देहि यशो देहि कवित्वं देहि देहि मे।
मूढत्वं च हरेद्देवि त्राहि मां शरणागतम् ।।7।।
इन्द्रादिविलसदद्वन्द्ववन्दिते करुणामयि।
तारे ताराधिनाथास्ये त्राहि मां शरणागतम् ।।8।।
अष्टभ्यां च चतुर्दश्यां नवम्यां यः पठेन्नरः।
षण्मासैः सिद्धिमाप्नोति नात्र कार्या विचारणा ।।9।।
मोक्षार्थी लभते मोक्षं धनार्थी लभते धनम्।
विद्यार्थी लभते विद्यां तर्कव्याकरणादिकम् ।।10।।
इदं स्तोत्रं पठेद्यस्तु सततं श्रद्धयाऽन्वितः।
तस्य शत्रुः क्षयं याति महाप्रज्ञा प्रजायते ।।11।।
पीडायां वापि संग्रामे जाड्ये दाने तथा भये।
य इदं पठति स्तोत्रं शुभं तस्य न संशयः ।।12।।
इति प्रणम्य स्तुत्वा च योनिमुद्रां प्रदर्शयेत

**।।माँ नीलसरस्वतीस्तोत्रं सत्य सन्तु मनसा कामा ।।**

Member : Indian Medical Association (IMA), Accredited Member : Australian Traditional Medicine Society (ATMS) & Fellow of : British Institute of Homoeopathy (U.K.)
Founder: Maa Aadhyeshakti Holitic Health & Care Foundation, Ayushey Yog Shiksha Pratishthana & Shree Maa Aadhyeshakti Spiritual Research Centre
Former Member : Morarji Desai National Institute of Yoga (MDNIY), Department of Ayush, Ministry of Health & Family Welfare of India
Maa Aadhyeshakti Needam - Nath Kuteer www.shivyogpath.com
Please Do not Call Only Whatsapp +91-7982858361 Shivyoginath@hotmail.com